# लीलावती

## श्रीमद्भास्कराचार्यविरचिता

---

### ०२६ व्यस्तत्रैराशिकम्

२३ - ०५ - २०१९

# गतकक्ष्यायाम् ...

- त्रैराशिकम्

# अस्यां कक्ष्यायाम् ...

❖ व्यस्तत्रैराशिकम्

# व्यस्तत्रैराशिकम्

इच्छावृद्धौ फले ह्रासो ह्रासे वृद्धिः फलस्य तु ।
व्यस्तं त्रैराशिकं तत्र ज्ञेयं गणितकोविदैः ॥

अन्वयः - इच्छावृद्धौ फले ह्रासः , (इच्छायाः) ह्रासे फलस्य वृद्धिः तु व्यस्तं त्रैराशिकं ज्ञेयं तत्र गणितकोविदैः ।

तद्यथा -

जीवानां वयसो मौल्ये तौल्ये वर्णस्य हेमनि ।
भागहारे च राशीनां व्यस्तत्रैराशिकं भवेत् ॥

# व्यस्तत्रैराशिकम्

अन्वयः - १) जीवानां वयसः मूल्ये २) हेमनि वर्णस्य तौल्ये ३) राशीनां भागहारे च व्यस्तत्रैराशिकं भवेत् ।

क्रियाक्रमकरी -

जीवानां गोमहिषहस्त्यश्वपदातिप्रभृतीनां वयसो यन्मौल्यं मूल्यपरिकल्पनं, तथा हेमसम्बन्धिनि वर्णस्य तौल्यं तुलोन्मानम्। तथा राशीनां यो भागहारो भागस्वीकरणं तत्र सर्वत्र व्यस्तत्रैराशिकं भवेत् ।

# जीववयोमूल्ये उदाहरणम्

प्राप्नोति चेत् षोडशवत्सरा स्त्री द्वात्रिंशतं विंशतिवत्सरा किम् ।
द्विधूर्वहो निष्कचतुष्कमुक्षा प्राप्नोति धूःषट्कवहस्तदा किम् ॥

अन्वयः - षोडशवत्सरा स्त्री द्वात्रिंशतं प्राप्नोति चेत् विंशतिवत्सरा किं (प्राप्नोति) । द्विधूर्वहः उक्षा निष्कचतुष्कं प्राप्नोति , धूःषट्कवहः तदा किं (प्राप्नोति) ।

# जीववयोमूल्ये उदाहरणम्

अन्वयः - षोडशवत्सरा स्त्री द्वात्रिंशतं प्राप्नोति चेत् विंशतिवत्सरा किं (प्राप्नोति) । द्विधूर्वहः उक्षा निष्कचतुष्कं प्राप्नोति , धूःषट्कवहः तदा किं (प्राप्नोति) ।

धूः, स्त्री, (धुर्व्वतीति । धुर्व्व + क्विप् ।) यानमुखम् । रथादेरग्रभागः । इत्यमरः । २ । ८ । ५५ ॥ (यथा, महाभारते । १ । १३६ । २१ । "क्षणात् प्रांशुः क्षणाद्ध्रस्वः क्षणाच्च रथधूर्गतः ॥") भारः । (यथा, रघुः । १ । ३४ । "तेन धूर्जगतो गुर्व्वी सचिवेषु निचिक्षिपे ॥") चिन्ता । इत्येकाक्षरकोषः ॥ (अग्रम् । यथा, रघुः । २ । २ । "अपांशुलानां धुरि कीर्त्तनीया ॥" हिंसके, त्रि । यथा, ऋग्वेदे । १० । ९४ । ७ । "दशधुरो दशयुक्ता वहद्भ्यः ॥" "दशभिर्धुरो धूर्भिर्हिंसितृभिः । तृतीयार्थे प्रथमा ।" इति तद्भाष्ये सायणः ॥)

# जीववयोमूल्ये उदाहरणम्

बुद्धिविलासिनी -

- षोडशवार्षिक्या अङ्गनाया शरीरगुणातिशयत्वेन मौल्यपरमत्वं तदूर्ध्वं यावद्वय उपचीयते तावन्मौल्यमपचीयते। अत इच्छावृद्धौ फले ह्रास इति।

- द्वे धुरौ वहतीति द्विधूर्वह उक्षा वृषः। लोके वर्षद्वयं वाहितो वृषो द्विधूरित्युच्यते। द्विधूर्वहस्य वृषस्य मौल्यपरमत्वम्। तस्मात्परं मौल्यापचयः। अतो व्यस्तानुपातः प्रसिद्धः।

# जीववयोमूल्ये उदाहरणम्

अन्वयः - षोडशवत्सरा स्त्री द्वात्रिंशतं प्राप्नोति चेत् विंशतिवत्सरा किं (प्राप्नोति) । द्विधूर्वहः उक्षा निष्कचतुष्कं प्राप्नोति , धूःषट्कवहः तदा किं (प्राप्नोति) ।

१६ → ३२
२० → ?

$$? = \frac{(१६ x ३२)}{२०} = २५\frac{३}{५}$$

२ → ४
६ → ?

$$? = \frac{(२ x ४)}{६} = १\frac{१}{३}$$ निष्काः

# वर्णीयसुवर्णतौल्ये उदाहरणम्

दशवर्णं सुवर्णं चेद्गद्याणकमवाप्यते ।
निष्केण तिथिवर्णं तु तदा वद कियन्मितम् ॥

अन्वयः - दशवर्णं सुवर्णं चेत् निष्केण गद्याणकम् अवाप्यते । तदा तिथिवर्णं तु कियन्मितम् (अवाप्यते) (इति) वद ।

[सुवर्णस्य गुणवत्तानिर्णयः कति वर्णाः तस्मिन् सन्तीति दृष्ट्वा निर्णीयते । दशवर्णसुवर्णस्यापेक्षया पञ्चदशवर्णसुवर्णमधिकमूल्यवत् । अतः समानमूल्ये अधिकवर्णसुवर्णस्य न्यूनभार एव लभ्यते ।] (*गद्याणकः किञ्चन भारपरिमाणम्)

१० → १
१५ → ?

$$? = \frac{(१० \times १)}{१५} = \frac{२}{३} \text{ गद्याणकाः}$$

# राशिभागहरणे उदाहरणम्

## सप्ताढकेन मानेन राशौ सस्यस्य मापिते ।
## यदि मानशतं जातं तदा पञ्चाढकेन किम् ॥

अन्वयः - यदि सप्ताढकेन मानेन सस्यस्य राशौ मापिते मानशतं जातं, तदा पञ्चाढकेन किं (जातम्) ।

[आढकः घनहस्तपरिमाणम्]

७ → १ ० ०
५ → ?

$$? = \frac{(७ x १००)}{५} = १४०$$

# व्याख्यातुरुदाहरणानि

१) अष्टाढकेन मानेन मापिता विंशतिर्यदि ।
षडाढकेन मानेन कति स्युर्गणकोच्यताम् ॥

२) पञ्चरक्तकमाषेण सुवर्णानां शतत्रयम् ।
तत् षड्रक्तकमाषेण का सङ्ख्या गणकोच्यताम् ॥

३) विस्तारे त्रिकराः स्युर्दैर्घ्ये नव कम्बलाः शतद्वितयम् ।
हस्तद्वयविस्ताराः षट्कायतयस्ततः कियन्तः स्युः ॥



# लीलावती

## श्रीमद्भास्कराचार्यविरचिता

## ०२६ व्यस्तत्रैराशिकम्

२३ - ०५ - २०१९